**CBSE कक्षा - 9 संस्कृत**

**एनसीईआरटी प्रश्न-उत्तर**

**पाठः - 8 लौहतुला**

**अभ्यासः**

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**
   i. **देशान्तरं गन्तुमिच्छन् वणिक्पुत्रः किं व्यचिन्तयत्?**
   ii. **स्वतुलां याचमानं जीर्णधनं श्रेष्ठी किम् अकथयत्?**
   iii. **जीर्णधनः गिरिगुहाद्वारं कया आच्छाद्य गृहमागतः?**
   iv. **स्नानानन्तरं पुत्रविषये पृष्टः वणिक्पुत्रः श्रेष्ठिनं किम् उवाच?**
   v. **धर्माधिकारिभिः जीर्णधनश्रेष्ठिनौ कथं सन्तोषितौ?**

   **उत्तराणि-**
   i. देशान्तरं गन्तुमिच्छन् वणिक्पुत्रः व्यचिन्तयत् - यत्र देशे अथवा स्थाने स्ववीर्यतः भोगाः भुक्ताः तस्मिन् स्थाने यः विभवहीनः वसेत् सः पुरुषाधमः भवति।
   ii. स्वतुलां याचमानं जीर्णधनं श्रेष्ठी अकथयत् - "भोः ! नास्ति सा, त्वदीया तुला मूषकैः भक्षिता।"
   iii. जीर्णधनः गिरिगुहाद्वारं बृहत्-शिलया (बृहच्छिल्या) आच्छाद्य गृहमागतः।
   iv. स्नानान्तरं पुत्रविषये पृष्टः वणिक्पुत्रः श्रेष्ठिनं उवाच - 'नदीतटात् सः श्येनेन हृतः।'
   v. धर्माधिकारिभिः जीर्णधनश्रेष्ठिनौ परस्परं तुला-शिशु प्रदानेन सन्तोषितौ।

2. **स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत-**
   i. **<u>जीर्णधनः</u> विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्।**
   ii. **श्रेष्ठिनः शिशुः स्नानोपकरणमादाय <u>अभ्यागतेन</u> सह प्रस्थितः।**
   iii. **श्रेष्ठी उच्चस्वरेण उवाच-भोः अब्रह्मण्यम् <u>अब्रह्मण्यम्</u>।**
   iv. **सभ्यैः तौ परस्परं संबोध्य <u>तुला-शिशु-प्रदानेन</u> सन्तोषितौ।**

   **उत्तराणि-**
   i. <u>कः</u> विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्?
   ii. श्रेष्ठिनः शिशुः स्नानोपकरणमादाय <u>केन</u> सह प्रस्थितः?
   iii. श्रेष्ठी उच्चस्वरेण उवाच-भोः अब्रह्मण्यम् <u>किम्</u>?
   iv. सभ्यैः तौ परस्परं संबोध्य <u>कथं</u> सन्तोषितौ?

3. **अधोलिखितानां श्लोकानाम् अपूर्णोऽन्वयः प्रदत्तः पाठमाधृत्य तं पूरयत-**
   i. **यत्र देशे अथवा स्थाने __________ भोगाः भुक्ता __________ विभवहीनः यः __________ स पुरुषाधमः।**
   ii. **राजन् ! यत्र लौहसहस्त्रस्य __________ मूषकाः __________ तत्र श्येनः __________ हरेत् अत्र संशयः न।**

   **उत्तराणि-**

i. स्ववीर्यतः, तस्मिन्, वसेत्
ii. तुलां, खादन्ति, बालकं

4. **तत्पदं रेखाङ्कितं कुरुत यत्र-**
   i. **ल्यप् प्रत्ययः नास्ति**
   **विहस्य, लौहसहस्त्रस्य, संबोध्य, आदाय**
   ii. **यत्र द्वितीया विभक्तिः नास्ति**
   **श्रेष्ठिनम्, स्नानोपकरणम्, सत्त्वरम्, कार्यकारणम्**
   iii. **यत्र षष्ठी विभक्तिः नास्ति**
   **पश्यतः, स्ववीर्यतः, श्रेष्ठिनः सभ्यानाम्**

   **उत्तराणि-**
   i. लौहसहस्त्रस्य
   ii. सत्त्वरम्
   iii. स्ववीर्यतः

5. **सन्धिना सन्धिविच्छेदेन वा रिक्तस्थानानि पूरयत-**

| | | | | |
|---|---|---|---|---|
| **(क) श्रेष्ठ्याह** | = | ________ | + | **आह** |
| **(ख) ________** | = | **द्वौ** | + | **अपि** |
| **(ग) पुरुषोपार्जिता** | = | **पुरुष** | + | ________ |
| **(घ) ________** | = | **यथा** | + | **इच्छया** |
| **(ङ) स्नानोपकरणम्** | = | ________ | + | **उपकरणम्** |
| **(च) ________** | = | **स्नान** | + | **अर्थम्** |

**उत्तराणि-**

| | | | | |
|---|---|---|---|---|
| (क) श्रेष्ठ्याह | = | श्रेष्ठी | + | आह |
| (ख) द्वावपि | = | द्वौ | + | अपि |
| (ग) पुरुषोपार्जिता | = | पुरुष | + | उपार्जिता |
| (घ) यथेच्छया | = | यथा | + | इच्छया |
| (ङ) स्नानोपकरणम् | = | स्नान | + | उपकरणम् |
| (च) स्नानार्थम् | = | स्नान | + | अर्थम् |

6. **समस्तपदं विग्रहं वा लिखत-**

| **विग्रहः** | | **समस्तपदम्** |
|---|---|---|

| | | |
|---|---|---|
| **(क) स्नानस्य उपकरणम्** | = | __________ |
| **(ख) _______ ________** | = | **गिरिगुहायाम्** |
| **(ग) धर्मस्य अधिकारी** | = | __________ |
| **(घ) _______ ________** | = | **विभवहीनाः** |

**उत्तराणि-**

| **विग्रहः** | | **समस्तपदम्** |
|---|---|---|
| (क) स्नानस्य उपकरणम् | = | स्नानोपकरणम् |
| (ख) गिरेः गुहायाम् | = | गिरिगुहायाम् |
| (ग) धर्मस्य अधिकारी | = | धर्माधिकारी |
| (घ) विभवेन हीनाः | = | विभवहीनाः |

7. **यथापेक्षम् अधोलिखितानां शब्दानां सहायतया "लौहतुला" इति कथायाः सारांशं संस्कृतभाषया लिखत-**
**वणिक्पुत्रः स्नानार्थम्**
**लौहतुला अयाचत्**
**वृत्तान्तं ज्ञात्वा**
**श्रेष्ठिनं प्रत्यागतः**
**गतः प्रदानम्**
**उत्तराणि- सारांशम्-**
एकः जीर्णधनः नामकः वणिक्पुत्रः आसीत्। तस्य पार्श्वे एका लौहतुला आसीत्। निर्धनः भूत्वा सः लौहतुलां श्रेष्ठिनः गृहे निक्षेपभूतां कृत्वा विदेशं गतः। प्रत्यागतः सः श्रेष्ठिनं लौहतुलाम् अयाचत्। श्रेष्ठी उवाच - 'सा तु मूषकैः भक्षिता।' ततः सः श्रेष्ठिपुत्रेण सह स्नानार्थम् गतः। तेन श्रेष्ठिपुत्रः गिरिगुहायां निक्षिप्तः। श्रेष्ठिना पृष्टः सः अवदत् - 'बालः श्येनेन अपहृतः'। विवदमानौ तौ राजकुलं गतौ। धर्माधिकारिणः सर्वं वृत्तान्तं ज्ञात्वा परस्परं तुला-शिशु-प्रदानम् च कृत्वा तौ संतुष्टौ अकुर्वन्।